१९

वनेचरस्य चरानुरूपं वचनम्

प्रस्तावना

हिन्दुसंस्कृतौ महाभारतस्य प्रभावः आबहोः कालादेव अमूल्यत्वेन गण्यते। शास्त्रेषु महाभारतविषये "भारतं पञ्चमो वेद" इति प्रसिद्धिः विद्यते। अस्य रचयिता महर्षिः कृष्णद्वैपायन-वेदव्यासः ग्रन्थविषये स्वयम् आह- 'यन्नेहास्ति न कुत्रचित्' इति। अर्थात् यस्मिन् विषये चर्चा ग्रन्थेऽस्मिन् न विहिता, तस्मिन् विषये चर्चा कुत्रापि न लब्धुं शक्या इति। अस्यैव ग्रन्थस्य वनपर्वणः कथा महाकविना भारविना किरातार्जुनीये महाकाव्ये संगृहीता। तत्र अक्षक्रीडायाः नियमानुसारं पराजितः युधिष्ठिरः राज्यभ्रष्टः सन् वने भ्रातृभिः द्रौपद्या च सह निवसति स्म। स दुर्योधनस्य प्रजापालनस्य नीतिं विज्ञातुं वनेचरं हस्तिनापुरं प्रेषितवान्। स च चरः तत्र गत्वा सर्वम् उदन्तं कथं विज्ञातवान्। किञ्च, प्रत्यागत्य च ततः राज्ञे युधिष्ठिराय सर्वं कया रीत्या निवेदितवान् इत्यादिकं सर्वं वयं पाठेऽस्मिन् पठिष्यामः। राज्ञां चराः तेषां नेत्रसदृशाः भवन्ति अतः ते यदि मिथ्या भाषेरन् तर्हि कीदृशी हानिः स्यादिति तु अनुमातुं शक्यते प्रायः युष्माभिः। अतः तैः कथं सत्यं कष्टदायकमपि वचनं राज्ञः समीपे उपस्थापनीयमिति सप्रसङ्गं ज्ञास्यामः पाठेऽस्मिन्। वस्तुतः राज्ञां चराः कथं भवेयुः इति अस्मात् पाठात् भवन्तः ज्ञातुं प्रभवन्ति।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- चराः राजकार्यं साधयितुं कथं प्रयतते इति ज्ञास्यति।
- राज्ञः तथा अमात्यानां मध्ये सम्पर्कः कथं भवेत्।
- हितैषिणः चराः कीदृशाः भवन्ति इति ज्ञास्यति।
- भारवेः अर्थगौरवविषये ज्ञास्यति।
- पाठम् अमुं पठित्वा अलङ्कारविषये ज्ञानं भविष्यति।
- भवतां छन्दोज्ञानम् अपि वर्धिष्यते।

१९.१) मूलपाठः

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ।। ११ ।।

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।। १२ ।।

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ।। १३ ।।

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ।। १४ ।।

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ।। १५ ।।

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ।। १६ ।।

१९.२) साम्प्रतम् मूलपाठम् अवगच्छाम

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः।।१

अन्वयः - कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिम् वेदितुम् यम् (वनेचरं युधिष्ठिरः) अयुङ्क्त। वर्णिलिङ्गी विदितः (सन्) स वनेचरः द्वैतवने युधिष्ठिरं समाययौ।

अन्वयार्थः - कुरूणां निवासाः जनपदविशेषाः कुरवः तेषां कुरूणाम्, अधिपस्य अधिपतेः कुरुदेशस्य भूपतेः राज्ञः दुर्योधनस्य, श्रियः राजसम्पदः राजलक्ष्म्याः, पालनीं पाल्यते रक्ष्यते यया ताम्, पालनकारिणीं सुप्रतिष्ठापिकाम्, प्रजासु जनेषु विषये प्रकृतिषु च, वृत्तिं व्यवहारं वार्ताम्, यादृशेन व्यवहारेण। प्रजाः पालयतः भूपतेः प्रतिष्ठा भवति, राज्ञः दुर्योधनस्य तादृशः व्यवहारः वर्तते न वा इति वेदितुं विज्ञातुम्, यं वनेचरं वने चरति इति वनेचरः तं द्वैतवनस्थं कञ्चित् किरातम्, अयुङ्क्त नियुक्तवान् संयोजितवान् राज्यवृत्तान्तं सम्यक् ज्ञातुं गुप्तचररूपेण हस्तिनापुरं प्रेषितवान् इत्यर्थः, वर्णिलिङ्गी वर्णः प्रशस्तिः अस्य अस्ति इति वर्णी, तस्य वर्णिनः लिङ्गं चिह्नं विद्यते यस्य स वर्णिलिङ्गी ब्रह्मचारिवेषधारी वनेचरः, विदितः वेदनं ज्ञानम् अस्य अस्ति इति ज्ञानवान्, परवृत्तान्तज्ञः (सन्) शत्रोः दुर्योधनस्य सकलवृत्तान्ताभिज्ञः इत्यर्थः,, द्वैतवने रागद्वेषविरहिते द्वैतनामके शान्ते तपोवने, युधिष्ठिरं युधि रणे तिष्ठति इति युधिष्ठिरः, तं पाण्डुपुत्रं ज्येष्ठपाण्डवं धर्मराजम्, समाययौ समागतवान् संप्राप्तवान्, तस्य समीपं समुपस्थितः इत्यर्थः।

सरलार्थः - दुर्योधनेन द्यूतक्रीडायां छलेन पराजितः युधिष्ठिरः सर्वस्वं हारयित्वा वनवासे निवसति स्म। तदा युधिष्ठिरस्य मनसि कथं दुर्योधनः राज्यं करोति इति विचारः उत्पन्नः। यतः राज्ये

प्रजाः यदि प्रसन्नाः तर्हि राज्ञः राजलक्ष्मीः सुप्रतिष्ठिता भवति। ततः स दुर्योधनस्य राज्यशासनपद्धतिं ज्ञातुं वनेचरं प्रेषितवान्। स च ब्रह्मचारिवेषं धृत्वा तत्र गत्वा सर्वं ज्ञातवान्। ततः स चरः युधिष्ठिराय सर्वं कथयितुं युधिष्ठिरसमीपं द्वैतवनं समागतः।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके गुप्तचरस्य माहात्म्यस्य अतिशयेन प्रतिपादनं भवति। राज्यभ्रष्टः युधिष्ठिरः वने भ्रातृभिः द्रौपद्या च सह निवसति। स दुर्योधनस्य प्रजापालनस्य नीतिं विज्ञातुं वनेचरं हस्तिनापुरं प्रेषितवान्। तत्र गत्वा सर्वं यथायथं च ज्ञात्वा स किरातः युधिष्ठिरं प्रति द्वैतवनं समागतवान्।

व्याकरणविमर्शः -

- वेदितुम् - विद्-धातोः तुमुन्-प्रत्यये वेदितुम् इति रूपम्।
- युधिष्ठिरः - युधि स्थिरः इति युधिष्ठिरः।
- वनेचरः - वने चरति इति वनेचरः।
- अयुङ्क्त – युज्-धातोः लङि प्रथमपुरुषैकवचने अयुङ्क्त इति रूपम्।
- समाययौ - सम्-आङ्-पूर्वकात् या-धातोः लिटि प्रथमपुरुषैकवचने समाययौ इति रूपम्।

प्रयोगपरिवर्तनम् -

- कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं (युधिष्ठिरेण) यः अयुज्यत, वर्णिलिङ्गिना तेन वनेचरेण द्वैतवने युधिष्ठिरः समायये।

अलङ्कारालोचना -

- "वने वनेचरः"-इत्यत्र वृत्यनुप्रासः अलङ्कारः अस्ति। वकारनकारयोः असकृत् आवृत्तिः अत्र हेतुः।

कोषः -

- श्रीः - "लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया"इत्यमरः।

पाठगतप्रश्नाः-१

१. वनेचरः कुत्र समाययौ।

२. वनेचरः कं समाययौ।

३. युधिष्ठिरः किं वेदितुं वनेचरम् अयुङ्क्त।

४. वनेचर-शब्दस्य कः अर्थः।

५. वर्णिलिङ्गी इति कस्य विशेषणम्।

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।२

अन्वयः - कृतप्रणामस्य सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः तस्य मनः न विव्यथे। हि हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

अन्वयार्थः - कृतप्रणामस्य कृतः विहितः प्रणामः नमस्कारः येन तस्य, अनेन भृत्यस्य विनयः सूच्यते, सपत्नेन शत्रुणा दुर्योधनेन, जितां (छलेन) गृहीतां वशीकृताम्, पुरा द्युतक्रीडया कपटेन छलेन अधुना, महीं पृथिवीम् राज्यम्, महीभुजे भूपतये राज्ञे युधिष्ठिराय, निवेदयिष्यतः विज्ञापयिष्यतः कथयिष्यतः, तस्य पूर्वं प्रेषितस्य वनेचरस्य किरातस्य गुप्तचरस्य, मनः चित्तं हृदयम्, न नहि, विव्यथे व्यथितम् दुःखितम् अभवत् इत्यर्थः, शत्रुणा राज्यं विजित्य यथाविधि प्रतिपालितम् इति एवम् अप्रियं राज्ञे कथं निवेदयामि इति विचिन्त्य, स चञ्चलः न जातः। व्यथाभावे कारणं वदति - हि यतः यस्मात् कारणात्, हितैषिणः प्रभुकल्याणकामिनः प्रभुविजयाभिलाषिणः भृत्याः, (कदापि) मृषा मिथ्या असत्यम् अलीकम्, प्रियं मधुरं मनोहरं श्रवणसुखदं (वचः वचनम्), प्रवक्तुं निवेदयितुं कथयितुम् अभिधातुम्, (भ्रमाद् अपि) न नहि, इच्छन्ति वाञ्छन्ति अभिलषन्ति।

सरलार्थः - वनेचरः प्रजासु दुर्योधनस्य व्यवहारं ज्ञात्वा वनं प्रत्यागतवान्। ततः युधिष्ठिरं प्रणम्य स दुर्योधनेन वशीकृतस्य राज्यस्य शासनविधिं यथायथं वक्तुम् उद्यतः। किन्तु कथं राज्ञे अप्रियं निवेदयामि इति विचिन्त्य तस्य मनः न व्यथितम्। अप्रियसत्यकथनम् एव हितैषिणां चराणां कर्तव्यम्। तत् प्रियं वा भवतु अप्रियं वा। यतो हि प्रभोः हितकारिणः भृत्याः कदापि मनसः तुष्टये मिथ्या न भाषन्ते। तेषां सत्यकथनम् एव परो धर्मः।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके गुप्तचरस्य दूतस्य गुणाः वर्णिताः। ते च गुणाः चतुर्विधाः - चतुरता, स्फूर्तिः, सत्यवादिता, तर्कश्च। स्वामिनः हितसम्पादनम् एव गुप्तचरस्य परमं प्रयोजनम्। अतः नीतिविषये राज्ञः सफलता अधिकांशतः दूतम् एव अवलम्ब्य वर्तते।

व्याकरणविमर्शः -

- विव्यथे - व्यथ्-धातोः लिट्लकारे विव्यथे इति रूपम्। व्यथितम् इत्यर्थः।
- कृतप्रणामस्य - कृतः प्रणामः येन सः कृतप्रणामः इति बहुव्रीहिसमासः, तस्य कृतप्रणामस्य।
- महीभुजे - महीं भुनक्ति इति महीभुक्, तस्मै महीभुजे।
- हितैषिणः - हितम् इच्छन्ति इति हितैषिणः।

सन्धिकार्यम्-

- मनो न = मनः + न (विसर्गसन्धिः)।

प्रयोगपरिवर्तनम् -

- कृतप्रणामस्य सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः तस्य मनसा न विव्यथे, हि हितैषिभिः मृषा प्रियं प्रवक्तुं न इष्यते।

अलङ्कारालोचना -

- अत्र हितैषिणः मृषा प्रियं वक्तुं न इच्छन्ति इति वाक्यार्थस्य पूर्ववाक्यसमर्थकतया अर्थान्तरन्यासः अलङ्कारः।

कोषः -

- मही - "गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही"इत्यमरः।

पाठगतप्रश्नाः-२

६. के मृषा प्रवक्तुं न इच्छन्ति।

७. कस्य मनः न विव्यथे।

८. हितैषिणः कीदृशं वचनं प्रवक्तुं न इच्छन्ति।

९. महीभुजे इत्यनेन कः विशेषितः।

१०. हितैषिणः शब्दस्य कः अर्थः।

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिननीं विनिश्चितार्थामिति वाचमाददे।।३

अन्वयः - स द्विषां विघाताय विधातुम् इच्छतः भूभृतः रहसि अनुज्ञाम् अधिगम्य सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आददे।

अन्वयार्थः - सः वनेचरः, द्विषां शत्रूणाम् दुर्योधनादिकौरवाणाम्, विघाताय विनाशाय उन्मूलनाय, विधातुं विधानम् व्यापारं कर्तुम्, येन केन उपायेन शत्रोः संहरणं भवेद् इति रूपेण इच्छतः अभिलषतः कामनां कुर्वतः, भूभृतः भूपतेः राज्ञः युधिष्ठिरस्य, रहसि एकान्ते विजने, अनुज्ञाम् आज्ञाम् कटुयथार्थकथनविषये स्वीकृतिम्, अधिगम्य प्राप्य लब्ध्वा, सौष्ठवौदार्यविशेषशालिनीं सुष्ठु सुन्दरम् तस्य भावः सौष्ठवं सुमधुरपदविन्यासः, उदारस्य सरलस्य भावः औदार्यम् ललितार्थप्रतिपादनम्, सौष्ठवं च औदार्यं च सौष्ठवौदार्ये, ताभ्यां विशेषेण अतिशयेन या शालते शोभते तच्छीला, ताम्। विनिश्चितार्थां सुस्पष्टार्थां विशेषरूपेण प्रकाशितार्थाम्, प्रमाणतः निणीतार्थाम्, इति एवं रूपां (वक्ष्यमाणरूपाम्) वाचं वाणीं वचनम्, आददे स्वीकृतवान् स्वीचकार उक्तवान्।

सरलार्थः - वनेचरः शत्रूणां विनाशसाधनाय उपायं चिन्तयतः राज्ञः युधिष्ठिरस्य आज्ञां प्राप्तवान्। ततः स निर्जनप्रदेशे तदानीं यत् वक्तव्यं तत् सुमधुरया भाषया वक्तुम् आरब्धवान्।

तात्पर्यार्थः - कथं दुर्योधनः राज्यं करोति, कथं च पराजितो भविष्यति इति एतत् सर्वं वृत्तान्तं ज्ञातुं वनेचरः हस्तिनापुरं गतवान् आसीत्। प्रस्तुते अस्मिन् श्लोके हस्तिनापुरतः प्रत्यागतः वनेचरः

युधिष्ठिरस्य आज्ञां प्राप्य युधिष्ठिरं प्रति एकान्ते कथं शब्दार्थचमत्कारसहितं वचनं वक्तुं प्रवृत्तः तत् सर्वं वर्णितम् ।

व्याकरणविमर्शः -

- भूभृतः - भुवं बिभर्ति इति भूभृत्, तस्य भूभृतः।
- विनिश्चितार्थाम् - विशेषेण निश्चितः विनिश्चितः इति तृतीयातत्पुरुषः, विनिश्चितः अर्थः यस्याः सा विनिश्चितार्था इति बहुव्रीहिसमासः, तां विनिश्चितार्थाम् इति बहुव्रीहिसमासः।
- आददे - आ-दा-धातोः आत्मनेपदिनः लिटि प्रथमपुरुषैकवचने रूपम्।
- इच्छतः - इष्-धातोः शतरि षष्ठ्येकवचने रूपम्।

सन्धिकार्यम्-

- रहस्यनुज्ञाम् = रहसि + अनुज्ञाम् (यण्-सन्धिः)।

प्रयोगपरिवर्तनम् -

- रहसि तेन द्विषां विघाताय विधातुम् इच्छतः भूभृतः अनुज्ञाम् अधिगम्य सौष्ठवौदार्यविशेषशालिनी विनिश्चितार्था इति वाक् आददे।

अलङ्कारालोचना -

- अत्र वृत्यनुप्रासालङ्कारः अस्ति। वकार-तकारयोः असकृत् आवृत्तिः अत्र कारणम्।

कोषः -

- रहः - "विविक्तविजनक्षत्रनिःशलाकास्तथा रहः"इत्यमरः।

पाठगतप्रश्नाः-३

११. कः सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थां वाचम् आददे।

१२. रहसि शब्दस्य कः अर्थः।

१३. वनेचरः किम् अधिगम्य वाचम् आददे।

१४. युधिष्ठिरः किमर्थं विधातुम् इच्छति।

१५. वनेचरः कीदृशं वाचम् आददे।

क्रियासु युक्तैर्नृप! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः।।४

अन्वयः - हे नृप! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः। अतः असाधु वा साधु क्षन्तुम् अर्हसि। हितं मनोहारि च वचः दुर्लभम् (भवति)।

अन्वयार्थः - हे नृप! नॄन् जनान् पाति रक्षति इति नृपः, तत्सम्बोधने हे नरेश! युधिष्ठिर! क्रियासु कर्तव्यविषयेषु, युक्तैः नियुक्तैः, अनुजीविभिः चरैः चरन्ति नानादेशम् इति चराः, चारचक्षुषः चारनयनाः, प्रभवः स्वामिनः, न, वञ्चनीयाः प्रतारणीयाः, नृपाः परराष्ट्रपरिज्ञाने चरान् नियुज्य सर्वं यथायथं जानन्ति, तस्मात् चरा एव तेषां नयनवत्। अतः अस्मात् कारणात्, असाधु असम्यक् अप्रियम्, वा, साधु सम्यक् प्रियम्, क्षन्तुं सोढुम्, अर्हसि योग्योऽसि। हितं परिणामे कल्याणकरम्, मनोहारि सद्यः प्रियम्, च वचः वचनम्, दुर्लभं दुःखेन लब्धुं शक्यं, प्रायशः असुलभम् इत्यर्थः। अतः भवता श्रोतव्यमेव।

सरलार्थः - हे राजन्! कस्मिन् अपि कर्मणि नियुक्तैः सेवकैः स्वस्वामिनां प्रतारणा न करणीया। यतः स्वामिनः चारनयनाः भवन्ति। अर्थात् कश्चित् नयनवान् पुरुषः यत् नयनेन पश्यति तदेव प्रमाणम् इति वदति। एवं चरेण यत् कथ्यते तदेव तेषां प्रमाणं भवति। सर्वथा सुप्रियं वचनं दुर्लभमेव। तस्मात् प्रियम् अप्रियं वास्तु धैर्यम् अवलम्ब्य श्रोतव्यम्।किञ्च समीचीनम् असमीचीनं यद् वा वदामि तदर्थं क्षन्तव्यः। यतः एकम् एव वाक्यं हितकरं मधुरं च उभयं प्राप्तुं न शक्यते।

तात्पर्यार्थः - प्रस्तुते श्लोके अस्मिन् चरस्य कर्तव्यता निरूप्यते। कार्ये नियुक्तैः सेवकैः प्रभवे सत्यम् एव वक्तव्यम्। यतो हि तादृशैः सेवकैः स्वामिनः नयनवन्तो भवन्ति। मिथ्याभाषिभिः सेवकैः नृपाः अन्धा भवन्ति। तस्मात् यथा अन्धाः कूपे पतन्ति तथा ते शत्रुजाले पतन्ति। किञ्च हितं वाक्यं सत्यम् अपि सर्वदा प्रियं न भवन्ति। चरस्य सत्यं श्रुत्वा स्वामी क्रुद्धः न भवेत्। तर्हि चरः कदापि सत्यं न वदिष्यति। तथा सति राज्यस्य नाशः भवेत्। तस्मात् सेवकेन सर्वदा सत्यं निवेदनीयम्, स्वामिना च तत् अप्रियम् अपि श्रोतव्यम्।

व्याकरणविमर्शः -

- चारचक्षुषः - चरन्ति इति चराः, चरा एव चाराः इति कर्मधारयः, चारा एव चक्षूंषि येषां ते चारचक्षुषः इति बहुव्रीहिसमासः।
- मनोहारि - मनो हरति इति मनोहारि।
- वञ्चनीयाः - वञ्च-धातोः अनीयर्-प्रत्यये रूपमिदम्।
- दुर्लभम् - दुःखेन लभ्यते यत् तत् दुर्लभम्।

सन्धिकार्यम्-

- युक्तैर्नृप = युक्तैः + नृप (विसर्गसन्धिः)।
- अतोऽर्हसि = अतः + अर्हसि (विसर्गसन्धिः)।

प्रयोगपरिवर्तनम् -

- नृप!क्रियासु युक्ताः अनुजीविनः चारचक्षुषः प्रभून् न वञ्चयेयुः, अतः असाधु साधु वा (त्वया) क्षन्तुम् अर्ह्यते, हितेन मनोहारिणा च वचसा दुर्लभेन (भूयते)।

अलङ्कारालोचना -

- अत्र "हितं मनोहारि च दुर्लभं वचः"-इति वाक्यार्थस्य असाधु साधु वा मम वचनं श्रोतव्यम् इति

वाक्यार्थं प्रति उपपादकतया अभिधानात् काव्यलिङ्गालङ्कारः।

कोषः -

- प्रभुः - "अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः" इत्यमरः।

पाठगतप्रश्नाः-४

१६. कीदृशैः अनुजीविभिः प्रभवः न वञ्चनीयाः।

१७. कीदृशं वचः दुर्लभम्।

१८. कीदृशाः प्रभवः न वञ्चनीयाः।

१९. चारचक्षुषः इति शब्दस्य कः अर्थः।

२०. स्वामिना कीदृशं वचः श्रोतव्यम्।

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।
सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।५

अन्वयः - यः अधिपं साधु न शास्ति, स किंसखा। यः हितात् न संशृणुते, स किंप्रभुः। हि सदा अनुकूलेषु नृपेषु अमात्येषु च सर्वसम्पदः रतिं कुर्वते।

अन्वयार्थः - यः सखा अमात्यादिः, अधिपं स्वामिनम्, साधु हितम्, न नहि, शास्ति उपदिशति, सः राज्ञः हितेषु विषयेषु अनुपदेष्टा अमात्यादिः, किंसखा कुत्सितः सखा दुर्मन्त्री इत्यर्थः। यः स्वामी, हितात् हितवादिनः अमात्यादेः समीपात्, न संशृणुते न शृणोति हितोपदेशं न गृह्णाति, सः अहितश्रोता, किंप्रभुः कुत्सितः प्रभुः अविवेकी इत्यर्थः। हि यतः, सदा सर्वदा, अनुकूलेषु अविरुद्धेषु, नृपेषु स्वामिषु, अमात्येषु मन्त्रिषु, च अपि, सर्वसम्पदः सकलसम्पत्तयः, रतिम् अनुरागम्, कुर्वते कुर्वन्ति।

सरलार्थः -यः सखा मन्त्री वा स्वामिने हितं न उपदिशति स कुसखा दुर्मन्त्री वा भवति। एवं यः प्रभुः राजा वा हितस्य उपदेष्टुः वाक्यं न शृणोति सोऽपि कुराजा एव। वस्तुतः राजानः अमात्याः च परस्परम् अनुरक्ताः स्युः। तर्हि तत्र सर्वा अपि राजसम्पत्तयः स्थिराः भवन्ति। अतः मया भवतः भाविमङ्गलाय यद् उच्यते तत् सावधानेन श्रोतव्यम्।

तात्पर्यार्थः - राज्यस्य समृद्ध्यर्थं नृपेषु सचिवेषु च ऐक्यमत्यम् आवश्यकं भवति इति प्रतिपादितम् अस्मिन् श्लोके। तथाहि यः सर्वदा प्रभुं हितम् एव वाक्यं वदति स एव योग्यः अमात्यः। य एवम् अमात्यादेः उपदेशं श्रुत्वा स्वीकरोति स योग्यः स्वामी। अत एव परस्परम् अनुरक्तयोः तयोः भवने राजलक्ष्मीः स्थिरा भवति। येन सा अन्यत्र गन्तुं एकम् अपि पदं न उत्थापयति।

व्याकरणविमर्शः -

- सर्वसम्पदः - सर्वाः चामूः सम्पदः चेति सर्वसम्पदः।
- शास्ति - शास्-धातोः लटि प्रथमपुरुषैकवचने रूपमिदम्।
- संशृणुते - सम्-श्रु-धातोः लटि प्रथमपुरुषैकवचने रूपमिदम्।

सन्धिकार्यम्-

- हितान्न = हितात् + न (हल्सन्धिः)।
- नृपेष्वमात्येषु = नृपेषु + अमात्येषु (यण्-सन्धिः)।

प्रयोगपरिवर्तनम् -

- येन अधिपः साधु न शिष्यते तेन किंसख्या (भूयते), येन हितात् न संशृणुते तेन किंप्रभुणा (भूयते), सदा अनुकूलेषु नृपेषु अमात्येषु च सर्वसम्पद्भिः रतिः क्रियते।

अलङ्कारालोचना -

- अत्र प्रभुभृत्ययोः ऐक्यमत्यं कारणम्, सर्वसम्पत्सिद्धिः च कार्यम्। तस्य कारणस्य कार्यसमर्थकतया अर्थान्तरन्यासः अलङ्कारः।

कोषः -

- सखा - "वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्"इत्यमरः।

पाठगतप्रश्नाः-५

२१. कः किंसखा।

२२. कः किंप्रभुः।

२३. अनुकूलेषु नृपेषु अमात्येषु किं भवति।

२४. कदा सर्वसम्पदः रतिं कुर्वते।

२५. शास्ति इत्यस्य कः अर्थः।

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम्।।६

अन्वयः - निसर्गदुर्बोधं भूपतीनां चरितं क्व। अबोधविक्लवाः जन्तवः क्व। मया विद्विषां निगूढतत्त्वं नयवर्त्म यत् अवेदि, (तत्) अयम् तव अनुभावः।

अन्वयार्थः - निसर्गदुर्बोधं स्वभावेन दुर्बोधं दुर्ज्ञेयम्, भूपतीनां राज्ञाम्, चरितं चरित्रम् कार्यकौशलम् इत्यर्थः, क्व कुत्र (वर्तते)। अबोधविक्लवाः अबोधेन अल्पबोधेन विक्लवाः विमूढाः

कर्तव्याकर्तव्यविवेकशून्याः, जन्तवः मादृशाः साधारणाः प्राणिनः, क्व कुत्र (वर्तन्ते)। बुद्धिमतां कार्यं बुद्धिमद्भिः एव अनुमेयम्, मया वनेचरेण, विद्विषां भवतः शत्रूणाम्, निगूढतत्त्वम् निगूढं सुगुप्तं तत्त्वं मन्त्रणादिकम् अतिगुप्तसारम्, नयवर्त्म नीतिमार्गः राजनीतिपथः, यत् यत्किञ्चित्, अवेदि ज्ञातम्, अयं (तु) इदं ज्ञानम्, तव भवतः युधिष्ठिरस्य, अनुभावः प्रभावः महिमा इत्यर्थः।

सरलार्थः - राज्ञां चरितम् अस्वाभाविकं भवति। तत् तु महामतिना जनेनापि सम्यक् ज्ञातुं न शक्यते। अतः मया मूढमतिना कथं ज्ञातुं शक्यते। तथापि अहं यत् किञ्चित् बहु वा ज्ञातवान्। तत् तु केवलं भवतः महिम्ना एव।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके राज्ञां चरित्रस्य दुर्बोधता तथा चरस्य विनयशीलता अपि च निरभिमानिता निरूपिता। कारणं हि राज्ञां व्यवहारः स्वभावतः एव बुद्धिमताम् अपि अज्ञातप्रायः भवति। मादृशां प्राणिनां तत्र का कथा। तथापि तव शत्रूणाम् अतिगुप्तः रहस्यमयो नीतिमार्गः मया ज्ञातः। तत् तवैव सामर्थ्यात् न तु तत्र मम सामर्थ्यम्।

व्याकरणविमर्शः -

- अवेदि - विद्-धातोः कर्मणि लुङि प्रथमपुरुषैकवचने अवेदि इति रूपम्।
- निगूढतत्त्वम् - निश्चयेन गूढं निगूढम् इति गतिसमास,निगूढं तत्त्वं यस्य तद् निगूढतत्त्वम् इति बहुव्रीहिसमासः।
- नयवर्त्म – नयस्य वर्त्म नयवर्त्म इति तत्पुरुषसमासः।

सन्धिकार्यम्-

- यन्मया = यत् + मया (हल्सन्धिः)।
- तवानुभावोऽयम् = तव + अनुभावः (सवर्णदीर्घः) + अयम् (विसर्गसन्धिः)।

प्रयोगपरिवर्तनम् -

- निसर्गदुर्बोधेन भूपतीनां चरितेन क्व (भूयते)। अबोधविक्लवैः जन्तुभिः क्व (भूयते)। निगूढतत्त्वं विद्विषां नयवर्त्म अहं यत् अवेदिषम् अनेन तव अनुभावेन (भूयते)।

अलङ्कारालोचना -

- अत्र विषमालङ्कारः विद्यते। द्वयोः कथनयोः अत्यन्तं विषमता तत्र हेतुः।

कोषः -

- जन्तुः - “प्राणी तु चेतनो जन्मी जन्तुजन्यशरीरिणः”इत्यमरः।

पाठगतप्रश्नाः-६

२६. भूपतीनां चरितं कीदृशं भवति।

२७. नयवर्त्म-शब्दस्य कः अर्थः।

२८. जन्तवः कीदृशाः भवन्ति।

२९. अनुभावः इत्यस्य कः अर्थः।

३०. वनेचरेण विद्विषां किम् अवेदि।

पाठसारः

युधिष्ठिरः दुर्योधनेन द्यूतक्रीडायां छलेन पराजितः सन् सर्वस्वं हारयित्वा वनवासे निवसति स्म। तदा युधिष्ठिरस्य मनसि कथं दुर्योधनस्य राज्यशासनविषये विचारः उत्पन्नः। यतः राज्ये प्रजाः यदि प्रसन्नाः तर्हि राज्ञः राजलक्ष्मीः सुप्रतिष्ठिता भवति। ततः स दुर्योधनस्य राज्यशासनपद्धतिं ज्ञातुं वनेचरं प्रेषितवान्। स च ब्रह्मचारिवेषं धृत्वा तत्र गत्वा सर्वं ज्ञात्वा ततः आगत्य युधिष्ठिराय सर्वं कथयितुं युधिष्ठिरसमीपं द्वैतवनं समागतवान्। ततः युधिष्ठिरं प्रणम्य स दुर्योधनेन वशीकृतस्य राज्यस्य शासनविधिं यथायथं वक्तुम् उद्यतः। किन्तु कथं राज्ञे अप्रियं निवेदयामि इति विचिन्त्य तस्य मनः न व्यथितम्। यतो हि अप्रियसत्यकथनम् एव हितैषिणां चराणां कर्तव्यम्। तत् प्रियं वा भवतु अप्रियं वा। तस्मात् प्रभोः हितकारिणः भृत्याः कदापि मनसः तुष्टये मिथ्या न भाषन्ते। तेषां सत्यकथनम् एव परो धर्मः। एवं वनेचरः शत्रूणां विनाशसाधनाय उपायं चिन्तयतः राज्ञः युधिष्ठिरस्य आज्ञां प्राप्य स निर्जनप्रदेशे तदानीं यत् वक्तव्यं तत् सुमधुरया भाषया वक्तुम् आरब्धवान् यत् - हे राजन्! कस्मिन् अपि कर्मणि नियुक्तैः सेवकैः स्वस्वामिनां प्रतारणा न करणीया। यतः स्वामिनः चारनयनाः भवन्ति। अर्थात् कश्चित् नयनवान् पुरुषः यत् नयनेन पश्यति तदेव प्रमाणम् इति वदति। एवं चारेण यत् कथ्यते तदेव तेषां प्रमाणं भवति। सर्वथा सुप्रियं वचनं दुर्लभमेव। तस्मात् प्रियम् अप्रियं वास्तु धैर्यम् अवलम्ब्य श्रोतव्यम्।किञ्च समीचीनम् असमीचीनं यद् वा वदामि तदर्थं क्षन्तव्यः। यतः एकम् एव वाक्यं हितकरं मधुरं च उभयं न भवति। किञ्च, यः सखा मन्त्री वा स्वामिने हितं न उपदिशति स कुसखा दुर्मन्त्री वा भवति। एवं यः प्रभुः राजा वा हितस्य उपदेष्टुः वाक्यं न शृणोति सोऽपि कुराजा एव। वस्तुतः राजानः अमात्याः च परस्परम् अनुरक्ताः स्युः। तर्हि तत्र सर्वा अपि राजसम्पत्तयः स्थिराः भवन्ति। अतः मया भवतः भाविमङ्गलाय यद् उच्यते तत् सावधानेन श्रोतव्यम्। राज्ञां चरितं सर्वदा अस्वाभाविकं भवति। तत् तु महामतिना जनेनापि सम्यक् ज्ञातुं न शक्यते। अतः मया मूढमतिना कथं ज्ञातुं शक्यते। तथापि अहं यत् किञ्चित् बहु वा ज्ञातवान्। तत् तु केवलं भवतः महिम्ना एव।

पाठान्तप्रश्नाः

१. वनेचरः केन कस्मिन् कर्मणि नियुक्तः।

२. वनेचरः केन उपायेन तत् कर्म सम्पादितवान्।

३. राजानः कैः किमर्थं न वञ्चनीयाः।

४. कः किंसखा। कश्च किंप्रभुः।

५. वनेचरस्य वचनं कीदृशम् आसीत्। कीदृशं च वचनं दुर्लभम्।

६. "क्व भूपतीनां चरितं क्व जन्तवः" - अत्र प्रयुक्तं क्वशब्दद्वयं किं सूचयति।

७. समानार्थकानि धातुरूपाणि मेलयत।

क-स्तम्भः	**ख-स्तम्भः**
१. अवेदि	क. कुर्वन्ति।
२. इच्छति	ख. व्यथितम्।
३. समाययौ	ग शक्नोति।
४. अर्हति	घ अज्ञायि।
५. कुर्वते	ङ. वाञ्छति।
६.आददे	छ. स्वीकृतवान्।
७. विव्यथे	ज. समागतवान्।

उत्तराणि - १-घ, २-ङ, ३-ज, ४-ग, ५-क, ६-छ, ७-ख।

किमधिगतम्

१) अमात्याः कथं भवेयुः इति अस्मात् पाठात् ज्ञायते।

२) प्रभुः कीदृशः भवेत् इत्यपि अस्मात् पाठात् ज्ञायते।

३) हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

४) हितं मनोहारि च वचः दुर्लभं भवति।

५) चराः कथं विनयिनः अनुगताः च भवन्ति इति बुध्यते।

६) नूतनशब्दानां तथा विविधालङ्काराणाम् अपि ज्ञानं प्राप्तम्।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. द्वैतवने।

२. युधिष्ठिरम्।

३. प्रजासु वृत्तिं वेदितुम्।

४. किरातः।

५. वनेचरस्य।

उत्तराणि-२

६. हितैषिणः।

७. वनेचरस्य।

८. मृषा प्रियम् च।

९. युधिष्ठिरः।

१०. कल्याणकामिनः।

उत्तराणि-३

११. वनेचरः।

१२. एकान्ते।

१३. अनुज्ञाम्।

१४. द्विषां विघाताय।

१५. सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम्।

उत्तराणि-४

१६. क्रियासु युक्तैः।

१७. हितं मनोहारि च।

१८. चारचक्षुषः।

१९. चारनयनाः।

२०. साधु असाधु वा।

उत्तराणि-५

२१. यः अधिपं साधु न शास्ति।

२२. यः हितात् न संश्रृणुते।

२३. सर्वसम्पदः रतिं कुर्वते।

२४. अनुकूलेषु नृपेषु अमात्येषु च।

२५. उपदिशति।

उत्तराणि-६

२६. निसर्गदुर्बोधम्।

२७. नीतिमार्गः।

२८. अबोधविक्लवाः।

२९. महिमा।

३०. निगूढतत्त्वम्।

॥ इति नवदशः पाठः ॥